जाबालः, पुं, ( जबालाया अपत्यं पुमानिति । अण् । ) अजाजीवः । इत्यमरः । २ । १० ।११॥ मुनिविशेषः । ( यथा, ब्रह्मवैवर्त्ते । १ । १६।१४॥

"जाबालो याजलिः पैलः करथोऽगस्त्य एव च ।
एते वेदाङ्गवेदज्ञाः षोड़शव्याधिनाशकाः ॥"

उपनिषद्विशेषः । यथा, मौक्तिकोपनिषदि ।

"ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः ।

दर्शनशास्त्रविशेषः । यथा, रामचन्द्रदत्तशाप प्रकरणे । [यात् ॥")

"अधीत्य कूटजाबालं शार्गालिं योनिमाशु-

जाबालिः, पुं, ( जबालाया अपत्यं पुमान् इति । इञ् । ) मुनिविशेषः । यथा, रामायणम् ॥

"सुयज्ञं वामदेवञ्च जाबालिमथ काश्यपम् ।"

( तथाच ब्रह्मवैवर्त्ते । २ । ४ । ७० ।

"ऋष्यशृङ्गो भरद्वाजश्चास्तीको देवलस्तथा ।
जैगीषव्योऽथ जाबालिर्यद्भृत्वा सर्व्वपूजितः ॥")

जामदग्न्यः, पुं, ( जमदग्नेरपत्यं पुमान् इति । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् । ) जमदग्निपुत्त्रः । परशुरामः । इति हेमचन्द्रः ॥ ( यथा, देवीभागते । २५ । ४१ ।

"पित्राज्ञया जामदग्न्येन पूर्व्वं
छिन्नं शिरो मातुरिति प्रशिष्टम् ।")

जामाता, [ ऋ ] पुं, ( जायां माति शिमीते-मिनोति वा । "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृ-जामात्रिति ।" उणां । २ । ६६ । इति निपातनात् साधुः । ) दुहितृपतिः । इत्यमरः । २ । ६ । ३२ । जामाइ इति भाषा ॥ ( यथा, हरिवंशे । ११६ । २५ ।

"जामाता त्वभवत्तस्य कंसस्तस्मिन् हते युधि ॥")

सूर्य्यावर्त्तः । धवः । इति मेदिनी । ते, ११० ॥

जामिः, स्त्री, ( जम्+इञ् । इन् निपातनात् साधुरित्येके ।) स्वसा । कुलस्त्री । इत्यमरः । ३ । ३ । १४२ ॥ ( यथा, मनुः । ३ । ५७ ।

"शोचन्ति जामयो यत्र विनश्यन्त्याशु तत्-
कुलम् ॥")

जामी, स्त्री, ( जामि+वा ङीष् । ) जामिः । इति शब्दरत्नावली ॥ ( यथा, महाभारते । १३ । ४६ । ७ ।

"यामीशप्तानि गेहानि निकृत्तानीव कृत्यया ॥")

जामेयः, पुं, ( जाम्या अपत्यमिति । "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) भागिनेयः । इति हेमचन्द्रः ॥

जाम्बवं, क्ली, ( जम्ब्वाः फलम् । "जम्ब्वा वा ।" ४ । ३ । १६४ । इत्यण् तस्य विधानात् न लुक् । ) जम्बूफलम् । इत्यमरः । २ । ४ । १६ ॥ ( यथा, सुश्रुते । १ । ४६ ।

"अत्यर्थं वातलं ग्राहि जाम्बवं कफपित्तजित् ॥")

सुवर्णम् । इति राजनिर्घण्टः ॥ जाम्बवति, पुं । इति शब्दभेदः ॥

जाम्बवती, स्त्री, ( जाम्बवतो अपत्यं स्त्री । अण् ततो ङीप् ।) श्रीकृष्णपत्नी । जाम्बवत्कन्या । इति श्रीभागवतम् ॥ (यथा, हरिवंशे । ३८ । ४१ ।

"लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम् ॥")

नागदमनी । इति राजनिर्घण्टः ॥

जाम्बवान्, [ त् ] पुं, (जम्बोर्वर्णं जाम्बवं तदस्यास्तीति मतुप् मस्य वः । पृषोदरादित्वात् साधुः । जम्बुतुल्यकृष्णत्वादस्य तथात्वम् । ) ऋक्षराजः । स ब्रह्मपुत्त्रः । यथा, रामायणे ।

"ऋक्षराजस्य पुत्त्रोऽत्र महाप्राज्ञः सुदुर्ज्जयः ।
पितामहसुतश्चात्र जाम्बवानिति विश्रुतः ॥" )

( यथाच, हरिवंशे । ३८ । ३५ ।

"धात्र्या कुमारमादाय सुतं जाम्बवतो नृप ! ॥")

जाम्बवी, स्त्री, (जाम्बवस्याकारोऽस्त्यास्याः इति ।) नागदमनी । इति राजनिर्घण्टः ॥

जाम्बुवान्, [त्] पुं, ( जाम्बवान् पृषोदरात् साधुः ।) जाम्बवान् । इति भरतो द्विरूपकोषश्च ॥

जाम्बूनदं, क्ली, ( जम्बूनद्यां भवमिति । अण् । ) स्वर्णम् । धुस्तूरः । इति राजनिर्घण्टः ॥ स्वर्णविशेषः । यथा ।"मेरुमन्दरपर्व्वतस्यजम्बूफलानामत्युच्चनिपातनविशीर्णानां अनस्थिप्रायाणां इभकायनिभानां रसेन जम्बूनामनदी इलावृतं वहति तस्या उभयोस्तीरयोर्मृत्तिका जम्बूरसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम स्वर्णं भवति ।" इति श्रीभागवतम् ॥

जायकं, क्ली, ( जयति अपरं गन्धमिति । जि+ण्वुल् । ) कालीयकम् । कालिया इति ख्यातं पीतवर्णसुगन्धिकाष्ठम् । इत्यमरः । २।६।१२५॥

जाया, स्त्री, ( जायते पुत्त्ररूपेणात्माऽस्यामिति । जन्+यक आत्वञ्च । ) भार्य्या । इत्यमरः । २ । ६ । ६ ॥ ( यथा, मनुः । ९ । ८ ।

"पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते ।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥")

जायाजीवः, पुं, ( जाया आजीवः जीवनोपायो यस्य इति । जायया जीवतीति वा । जीव+अच् । जायायाः सङ्गीतनर्त्तनादिना जीवनादस्य तथात्वम् ।) नटः । इत्यमरः । २।१०।१२॥

जायानुजीवी, [ न् ] पुं, ( जायया अनुजीवतीति । अनु+जीव+णिनिः ।) नटः । वकपक्षी । इति मेदिनी । ने, १५५ ॥ वेश्यापतिः । इति शब्दरत्नावली ॥ दुःस्थः । इति हेमचन्द्रः ॥

जायापती, पुं, (जाया च पतिश्चेति तौ । ) भार्य्यापती । मागभातार इति भाषा ॥ नित्यद्विवचनान्तोऽयं शब्दः । इत्यमरः । २ । ६ । ३८ ॥

जायी, [ न् ] पुं, ( जै+णिनिः । यद्वा, जि+णिनिः । ) ध्रुवकभेदः । यथा,—

"जायीति नाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः ।
सन्निपातेन तालेन शृङ्गारेऽभीष्टदो रसे ॥"
इति सङ्गीतदामोदरः ॥

( यथा, महाभारते । ३ । ३५ । ८ ।

"अफलं जन्म तस्याहं मन्ये दुर्ज्जातजायिनः ॥")

जायुः, पुं, ( जयति रोगान् इति । जि+उण् । ) औषधम् । इत्यमरः । २ । ६ । ५० ॥ (जयतीति । जयशीले, त्रि ॥ )

जारः, पुं, ( जीर्य्यति स्त्रियाः सतीत्वमनेन । जॄ+करणे घञ् ।) उपपतिः । इत्यमरः ।२ ।६। ३५ ॥ ( यथा, याज्ञवल्क्ये । २ । ३० ।

"जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम् ॥"

जारयति नाशयति इति । जॄ+णिच्+अच् । हन्ता । यथा, ऋग्वेदे । १ । ६६ । ४ ।

"यमोह जातो यमो जनित्वं जारः कनीनां
पतिर्ज्जनीनाम् ॥")

जारजः, त्रि, (जारात् उपपतेर्ज्जायते इति । जन्+डः । ) उपपतिजातसन्तानः । इत्यमरः । २ । ६ । ३६ ॥ ( यथा, मनुः । ३ । १५८ । श्लोके कुल्लूकभट्टधृतटीकायाम् ।

"अमृते जारजः कुण्डो मृते भर्त्तरि गोलकः ॥")

जारणी, स्त्री, ( जारयति परिपाकं कारयतीति । जॄ+णिच्+ल्युः । ततो ङीप् ।) स्थूलजीरकः । इति राजनिर्घण्टः ॥

जारी, स्त्री, (जारयति जीर्णं कारयतीति । जॄ+णिच्+अच्+गौरादित्वात् ङीष् । ) ओषधीविशेषः । इति मेदिनी । रे, ३६ । जाड़ी इति भाषा ॥

जारूथ्यः, पुं, (जरूथं मांसं तदर्हतीति । जरूथ+ञ्यः । ) त्रिगुणदक्षिणाकयज्ञः । ( यथा, महाभारते । ३ । २९० । ७० ।

"ततो देवर्षिसहितः सरितं गोमतीमनु ।
दशाश्वमेधानाजह्रे जारूथ्यान् स निरर्गलान् ॥")

जालं, क्ली, ( जलति आच्छादयतेऽनेनेति । जल-संवरणे+करणे घञ् । यद्वा, जले क्षिप्यते इति । जल+"शेषे ।" ४ । २ । ९२ । इत्यण् ।) स्वनामख्यातसूत्रादिनिर्म्मितमत्स्यादिधारणोपायः । तत्पर्य्यायः । आनायः २ । इत्यमरः । ३ । ३ । १९९ ॥ जालकम् ३ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् । ५५८ ।

"वंशावलम्बनं यद् यो विस्तारो गुणस्य
यावनतिः ।
तज्जालस्य खलस्य च निजाङ्कसुप्तप्रणाशाय ॥")

गवाक्षः । ( यथा, रघुः । ६ । ४३ ।

"प्रासादजालैर्जलवेणिरम्यां
रेवां यदि प्रेक्षितुमस्ति कामः ॥")

क्षारकः । स तु अस्फुटकलिकाकुष्माण्डादि-क्षुद्रफलञ्च । दम्भः । समूहः । इति मेदिनी । ले, १९ ॥ ( यथा, रघुः । ७ । ६२ ।

"ततो धनुष्कर्षणमूढ़हस्तं
एकांशपर्य्यस्तशिरस्त्रजालम् ॥"

वंशलौहादिनिर्म्मितजालवद्द्रव्यविशेषः । यथा, भट्टिः । १ । ८ ।

"अन्तर्निविष्टोज्ज्वलरत्नभासो
गवाक्षजालैरभिनिष्पतन्त्यः ॥")

इन्द्रजालम् । इति हेमचन्द्रः । ३ । ५९० ॥

जालः, पुं, ( जालयति शाखाप्रशाखादिभिः संवृणोतीति । जल संवरणे+णिच्+"नन्दि-ग्रहीति ।" ३।१।१३४ । इत्यच् ।) कदम्बवृक्षः । इति मेदिनी । ले, १९ ॥